दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणत्रयोदशी
फाल्गुण 17 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-129 | 1 | मार्च 01, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



**2** आगामिषु अष्टमासेषु सर्वेषु चिकित्सा-महाविद्यालयेषु विश्वस्तरीया प्रौद्योगिकी उपलब्धा भविष्यति- सुखविंद्रसिंह सुक्खुः

**3** 500 वर्षाणाम् ऐतिहासिक धरोहरं समर्पिता टांकरी लिपि- प्रशिक्षणकार्यशाला भव्यतया समाप्ता

**4** राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन च आन्ध्रप्रदेशस्य काकीनाडाजनपदे जातेन विस्फोटेन अभूतपूर्वप्राणहानेः विषये गभीरं दुःखं प्रकटितवन्तः।


## प्रधानमन्त्री नरेन्द्रमोदी राजस्थानस्य अजमेर-नगरे चतुर्दशवर्षीयाणां बालिकानां कृते राष्ट्रव्यापी-HPV-प्रतिरक्षण-अभियानस्य शुभारम्भं कृतवान्




**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी राजस्थानस्य अजमेर-नगरे चतुर्दशवर्षीयाणां बालिकानां कृते राष्ट्रव्यापी-HPV-प्रतिरक्षण-अभियानस्य शुभारम्भं कृतवान् । पञ्च-बालिकाभ्यः 'HPV' सूच्यौषधं प्रदाय औपचारिकरूपेण अस्य अभियानस्य शुभारम्भो जातः। अत्रावसरे प्रधानमन्त्री षोडश-सहस्र-कोटि-रूप्यतोऽप्यधिकानां विविध-परियोजनानां उद्घाटनं, शिलान्यासञ्च अकरोत्। सहैव राजस्थान-सर्वकारस्य विभिन्न विभागेषु नवनियुक्तेभ्यः एकविंशति-सहस्रतोऽप्यधिकेभ्यः युवकेभ्यः सः नियुक्ति-पत्राणि वितरीतवान्। अवसरेऽस्मिन् प्रधानमन्त्री प्रोक्तवान् यत् भाजपा-सर्वकारः सर्वदा महिलानां लघु-समस्यानामपि निवारणाय प्राथमिकतां प्रयच्छति। सः अवदत् यत् गर्भाशय-मुख-कर्कट-रोगस्य निवारणाय इदं प्रतिरक्षण-अभियानं महिलानां सशक्तिकरणाय कश्चन महत्वपूर्ण-पदक्षेपः वर्तते। श्री मोदिना प्रोक्तं यत् महिलाः प्रत्येकस्य गृहस्य आधारभूताः वर्तन्ते सहैव चतुर्दशाधिक-द्विसहस्रतमात् भाजपासर्वकारेण महिलानां कृते बहव्यः परियोजनाः प्रचालिताः। भारतीय-सशस्त्र-बलानां प्रशंसां कुर्वन् प्रधानमन्त्री अवदत् यत् देशस्य सेना प्रत्येकस्मिन् स्तरे साफल्यं प्राप्नोति। किन्तु काँग्रेस-दलेन रक्षा-बलानां विषये प्रश्नाः उत्थापिताः। अतः देशः सम्प्रति काँग्रेस-दलं निवारयति। नवदिल्ल्यां एआई-इम्पैक्ट-समिट-कार्यक्रमे काँग्रेस-दलस्य अभद्र-व्यवहारं लक्ष्यीकृत्य सः अवदत् यत् एतादृशेन भव्य आयोजनेन सम्पूर्णः देशः गौरवान्वितः आसीत्, परन्तु निर्वाचनेषु वारं-वारं पराजयेन दुःखितः काँग्रेस-दलम् अन्ताराष्ट्रिय-अतिथीनां पुरतः देशस्य निन्दां करोति।

## डीआरडीओ इत्यनेन, ओडिशा-तटस्य चांदीपुरस्य एकीकृत परीक्षण-क्षेत्रात् अति-अल्प-परिधि-वायु-रक्षा-प्रणाल्याः त्रीणि उड्डयन-परीक्षणानि सफलतया सम्पादितानि



**हिमसंस्कृतवार्ताः** - रक्षा-अनुसंधान एवं विकास-संगठनेन, डी. आर. डी. ओ. इत्यनेन ओडिशा-तटस्य चांदीपुरस्य एकीकृत-परीक्षण-क्षेत्रात् अति-अल्प-परिधि-वायु-रक्षा प्रणाल्याः वी. एस. ओ. आर. ए. डी. एस. त्रीणि सफलानि उड्डयन परीक्षणानि सफलतया सम्पादितानि। रक्षामन्त्रालयः अवदत् यत् एतानि परीक्षणानि भिन्नवेगेन, परिधौ, ऊर्ध्वतायां च उड्डीयमानानां द्रुतगतिसम्पन्नानां विभीषिकानां निर्मूलनार्थं विशोर्ड्स प्रक्षेप-व्यवस्थायाः क्षमतां परीक्षणाय कृतानि। सर्वेषु उड्डयन-परीक्षणेषु प्रक्षेपास्त्रैः शत्रुवाहनानां अनुकरणं कुर्वन्तः उच्च-गति-वायु-लक्ष्यानि अवरोधितानि, सर्वासु चरम-संघर्ष-विन्दुषु मिलित्वा विभिन्नेषु सङ्कट-परिदृश्येषु नष्टानि च कृतानि। रक्षामन्त्रिणा राजनाथसिंहेन डी. आर्. डी. ओ., सशस्त्रसेनाः, उद्योगाः इत्येताः च सफल उड्डयन-परीक्षणाय अभिनन्दिताः।

## इज़रायल-देशे अनुवर्तमानां सुरक्षा-स्थितिं उद्दिश्य भारत-सर्वकारेण तत्र स्थिताः भारतीय-नागरिकाः सावधानतया स्थातुं निर्दिष्टाः।

इज़रायल-देशे अनुवर्तमानां सुरक्षा-स्थितिं उद्दिश्य भारत-सर्वकारेण तत्र स्थिताः भारतीय-नागरिकाः सावधानतया स्थातुं निर्दिष्टाः। इज़रायल-स्थितेन भारतीय दूतावासेन भारतीय-नागरिकाः प्रार्थिताः यत् ते इज़रायल-प्रशासनेन निर्दिष्टान् सुरक्षा-निर्देशान् कठोरतया पालयेयुः। भारतीय-नागरिकाः परामृष्टाः यत् अग्रिम सूचना-पर्यन्तं ते इज़रायल-देशाभ्यन्तरे अनावश्यकं भ्रमणं न कुर्युः। सहैव आपत्काल-स्थितौ, भारतीय नागरिकाः भारतीय दूतावासेन सह 972-54-7520711 इति दूरभाषसंख्यायां सम्पर्क कर्तुं शक्नुवन्ति ।

## प्रधानमन्त्री गुजरातस्य प्रवासावधौ सानन्दे मैक्रान् सेमिकण्डक्टर् टेक्नालजी इण्डिया प्राईवेट् लिमिटेड् इत्यस्य सेमिकण्डक्टर् असेम्बली, टेस्ट् एण्ड् पेकेजिङ्ग सौकर्यस्य उद्घाटनम् अकरोत्



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री गुजरातस्य प्रवासावधौ सानन्दे मैक्रान् सेमिकण्डक्टर् टेक्नालजी इण्डिया प्राईवेट लिमिटेड् इत्यस्य सेमिकण्डक्टर् असेम्बली, टेस्ट् एण्ड् पेकेजिङ्ग सौकर्यस्य उद्घाटनम् अकरोत्। साणन्द-ए. टि. एम्. पि. सौकर्यात् प्रथमस्य मेड्-इन्-इण्डिया सेमिकण्डक्टर्-मेमोरी-माड्यूल् इत्यस्य वाणिज्यिक उत्पादनस्य, प्रेषणस्य च आरम्भेण, उद्घाटनम् भारतस्य सेमिकण्डक्टर्-निर्माणयात्रायां महत्त्वपूर्णं सोपानं निर्दिशति। अयं विकासः वैश्विक-सेमिकण्डक्टर्-मूल्यशृङ्खलायां भारतस्य स्थानं सुरक्षयितुं प्रमुखं सोपानं निरूपयति। अस्मिन् अवसरे जनसमूहं सम्बोधयन् श्रीमोदी अवदत् यत् भारते आयोजितं इण्डिया-ए. आई. इम्पैक्ट-शिखरसम्मेलनं स्वस्य ए. आई. क्षमतावशात् विश्वं प्रभावयति। अस्मिन् अवसरे केन्द्रीय-सूचना-प्रसरण-मन्त्री अश्विनी वैष्णवः अवदत् यत् सेमिकण्डक्टर्-उद्योगः आधारभूत-समवायः अस्ति येन वैश्विक-मानचित्रे भारतस्य स्थानं सुनिश्चितम्। सः अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे इलेक्ट्रानिक्स् उत्पादनं षट्गुणितं वृद्धिम् अवाप्नोत्, इलेक्ट्रानिक्स्-निर्यातः अष्टगुणितं वृद्धिम् प्राप्नोदिति। सः अवदत् यत्, अधुना चर-दूरवाण्याः निर्यातः देशस्य प्रमुखेषु वस्तुषु अन्यतमः अभवत्

## सुभाषितम्

**उच्छेदनं चापचयं,**
**पीडनं कर्षणं तथा।**
**इति विद्याविदः प्राहुः,**
**शत्रौ वृतं चतुर्विधम्।।**

भावार्थः- विद्वानों का यह कथन है कि संपत्ति को नष्ट करना, उत्पीडन करना, हानि पहुंचाना, तथा शस्त्रों का संग्रह करना, शत्रुता उत्पन्न करने के चार गुप्त कारण हैं।


दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263



सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## इजरायल-देशः संयुक्तराज्य अमेरिका च ईरान-देशोपरि भीषणम् आक्रमणं कृतवन्तौ।

**हिमसंस्कृतवार्ताः** - इजरायल-देशः संयुक्तराज्य अमेरिका च ईरान-देशोपरि भीषणम् आक्रमणं कृतवन्तौ । तेहरानं समेत्य ईरानस्य बहुषु नगरेषु विस्फोटाः अभवन्। अमेरिका-राष्ट्रपतिः डोनाल्ड ट्रम्पः सामाजिक-माध्यमेन प्रसारितस्य अष्ट-निमेषात्मकस्य चित्राङ्कनस्य विषये प्रोक्तवान् यत् वाशिंगटन-प्रशासनेन ईरान देशे सैन्य अभियानस्य आरम्भः कृतः। तेनोदीरितं यत् वर्तमान-ईरानी-प्रशासनात् अमेरिका-देशस्य राष्ट्रिय-सुरक्षा-हितं रक्षितुं अमेरिकी सेना व्यापकं निरन्तरं च अभियानं प्रचालयति। सः एतदपि अघोषयत् यत् अस्य प्रहारस्य मुख्योद्देश्यं ईरानी-प्रशासनात् सङ्कटं निवार्य अमेरिकी-जनानां रक्षाकरणम् इत्यस्ति। इज़रायलदेशस्य रक्षामन्त्री इज़रायल-काट्ज़ अवदत् यत् तस्य देशेन ईरान विरुद्धं पूर्व-निवारक-आक्रमणम् आरब्धम्, सः सम्पूर्ण देशे आपत्स्थितेः अपि घोषणां अकरोत्।

# आगामिषु अष्टमासेषु सर्वेषु चिकित्सा- महाविद्यालयेषु विश्वस्तरीया प्रौद्योगिकी उपलब्धा भविष्यति- सुखविंद्रसिंह सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्द्रसिंह सुक्खुः शनिवासरे आईजीएमसी शिमला संस्थानात् गर्भाशय- ग्रीवा- कर्कटरोग- निवारणार्थं राज्यस्तरीयं एचपीवी- टीकाकरण- अभियानस्य शुभारम्भं कृत्वा अवदत् यत् आगामिषु ९० दिनेषु १४-वर्षीयाः ६५,००० बालिकाः एतेन सूच्यौषधेन आच्छादिताः भविष्यन्ति। सः अभिभावकान्, पञ्चायतप्रतिनिधीन्, स्वास्थ्यकर्मचारिणः च आहूय अस्य कार्यक्रमस्य सफलतायै जनजागरूकतायाः महत्त्वं प्रतिपादितवान्।

मुख्यमन्त्री हिमाचलप्रदेशे वर्धमानानां कर्कटरोग- प्रकरणानां विषये चिन्तां व्यक्तीकृत्य अवदत् यत् राज्यसर्वकारः अस्य रोगस्य विरुद्धं विशेषतया प्रयत्नशीलाऽस्ति। सः अवदत् यत् गतचत्वारिंशत्- वर्षपर्यन्तं सर्वकाराः एकस्मिन् एव मार्गे सञ्चरन्त्यः आसन्, किन्तु अस्याः व्यवस्थायाः परिवर्तनाय राज्यसर्वकारेण "व्यवस्था-परिवर्तनम्" इति घोषः कृतः। यदि अस्माकं सर्वकारापि पञ्चवर्षपर्यन्तं तथैव आचरितवती स्यात्, तर्हि हिमाचलप्रदेशः स्वास्थ्यक्षेत्रे बहु पृष्ठे पतितः स्यात्। अद्य कर्कटरोगस्य उपचारः शक्यः अस्ति, यदि समये सम्यक् उपचारः लभ्यते इति सः उक्तवान्।

राज्यसर्वकारः हमीरपुरे ३०० कोटि-रूप्यक-व्ययेन अत्याधुनिकं कर्कटरोग-चिकित्सालयं निर्मातुं संकल्पितवती, यतः रोगिभ्यः राज्ये एव सुलभं सुलभमूल्यं च उपचारं दातुं शक्येत्।मुख्यमंत्री उक्तवान् यत् आगामिषु अष्टमासेषु आईजीएमसी शिमलासहितं प्रदेशस्य सर्वेषु चिकित्सामहाविद्यालयेषु विश्वस्तरीययन्त्राणि उपकरणानि च स्थाप्यन्ते। आगामिषु त्रिषु वर्षेषु सर्वेषु क्षेत्रीय-चिकित्सालयेषु, आदर्श- स्वास्थ्य- संस्थानेषु, पीएचसी-सीएचसी-केन्द्रेषु अपि एम्स इव आधुनिक-प्रौद्योगिकी उपलब्धा भविष्यति। राज्यसर्वकारः स्वास्थ्यपर्यटनस्य विकासाय पञ्चवर्षीयं लक्ष्यं निश्चितवती, यस्य लाभः जनानां चिकित्सकानां, पैरा-मेडिकल-कर्मचारिणां तथा प्राविधिकानां च भविष्यति। उच्चस्तरीययन्त्राणां स्थापने ३,००० कोटि-रूप्यकव्ययः क्रियते।

मुख्यमन्त्री अवदत् यत् गतत्रिवर्षेषु स्वास्थ्यक्षेत्रे अनेकानि सुधारकार्याणि कृतानि। वैद्यैः सह नर्साः, प्राविधिककर्मचारिणः, शल्यकर्मसहायकाः, रेडियोग्राफराः इत्यादीनां पदानि स्वीकृतानि पूर्यन्ते च। शुक्रवासरे आईजीएमसी शिमला मध्ये आधुनिक-३-टेस्ला-एमआरआई-यन्त्रस्य उद्घाटनं कृतम्, यतः अत्र १९-वर्ष-पुरातनं यन्त्रं कार्यरतं आसीत्। "सामान्यजनस्य पीडां ज्ञात्वा तस्य कल्याणाय निर्णयग्रहणमेव व्यवस्थापरिवर्तनम्" इति सः उक्तवान्।

राज्यसर्वकारः पञ्चसु चिकित्सामहाविद्यालयेषु रोबोटिक- शल्यचिकित्सायाः आरम्भं कर्तुं संकल्पिता। चमियाना-अस्पताले तथा टाण्डा- चिकित्सामहाविद्यालये आरभ्य १० मार्चदिने आईजीएमसी शिमला मध्ये अपि एषा सुविधा प्रवर्तिष्यते। स्वास्थ्य-परिवार-कल्याण-मन्त्री धनी राम शांडिल उक्तवान् यत् मुख्यमन्त्री सुखविन्द्रसिंह सुक्खु स्वास्थ्य-शिक्षाक्षेत्रयोः विशेषं ध्यानं ददाति। एचपीवी- टीकाकरण- अभियानं नियमित- टीकाकरण- कार्यक्रमे समावेश्य बालिकाभ्यः निःशुल्कं औषधिः दास्यते। अभियानं वैद्यकीय- अधिकारिणां निरीक्षणे सञ्चालयिष्यते इति सः अवदत्। एतत् अभियानं मुख्यमन्त्रिणः कुशल- नेतृत्वस्य दूरदर्शिन्याः चिन्तायाश्च परिणामः इति मन्त्रीमहोदयः उक्तवान्।

# मार्चमासस्य द्वितीये दिनाङ्के भविष्यति अन्तिम- परिसीमनम्; पञ्चायतानां पुनर्सीमाङ्कनस्य आक्षेप- पञ्जीकरणस्य अवधिः समाप्ता




**हिमसंस्कृतवार्ताः- शिमला।** पञ्चायतानां अन्तिमपरिसीमनं मार्चमासस्य द्वितीये दिनाङ्के (२ मार्च) भविष्यति। पञ्चायतानां प्रस्तावानन्तरं आक्षेपपञ्जीकरणस्य या अवधिः निर्धारिता आसीत्, सा २७ फरवरी दिनाङ्के समाप्ता अभवत्। अस्मात् कारणात् अधुना २ मार्च दिनाङ्के पञ्चायतानाम् अन्तिमं परिसीमनं करिष्यते। अस्य अन्तिम- प्रकाशनस्य अनन्तरं १० दिनानां समयः 'पुनरावेदनाय' (Appeel) दास्यते, यः ११ मार्च पर्यन्तं भविष्यति। एतासां पुनरावेदनानां श्रवणं मण्डलीय- आयुक्तैः सप्तसु दिनेषु करणीयम्, तदनुसारं च २० मार्च पर्यन्तं संशोधितं अन्तिमप्रकाशनं प्रकाशितं करणीयम्। प्रदेशसर्वकारेण परिसीमनस्य आरक्षण- रोस्टर- प्रक्रियायाः च कृते ३१ मार्च पर्यन्तं समयः दत्तः अस्ति। पञ्चायतीराज- विभागेन सर्वेषां जनपदानामुपायुक्तेभ्यः अस्मिन् सन्दर्भे पत्रं प्रेषितम्। तदनन्तरम् अष्टसप्ताहेषु अर्थात् ३१ मई पर्यन्तं निर्वाचनसञ्चालनम् अनिवार्यं भविष्यति। पत्रे स्पष्टीकृतं यत् खण्डानां (Blocks) पुनर्सङ्घटनं नूतन- ग्रामपञ्चायतानां निर्माणं च २० मार्च दिनाङ्कपर्यन्तं पूर्णं भवेत्। सर्वेभ्यः अधिकारिभ्यः निर्देशः दत्तः यत् ते निर्धारितसमये प्रक्रियाम् समाप्य विभागं सूचयेयुः। सर्वेभ्यः उपायुक्तेभ्यः अधुना जिला- परिषद्-वार्ड, पञ्चायत-समितिः, ग्रामपञ्चायतानां च परिसीमनं अस्याः समयसारण्याः (Schedule) अनुसारं करणीयम्। निर्वाचनक्षेत्राणां अन्तिम-आरक्षणं ३१ मार्च पर्यन्तं पूर्णं करणीयम् इति अनिवार्यं कृतम्।

**३१ जनवरी दिनाङ्के समाप्तः पञ्चायतानां कार्यकालः**

पञ्चायतीराज- विभागस्य निदेशकेन राघवशर्मा महोदयेन एते निर्देशाः कृताः। पञ्चायतीराज- विभागस्य पत्रानुसारं येषु जनपदेषु वार्ड-परिसीमनं आरक्षणं च अद्यापि अन्तिमरूपेण न अभवत्, तत्र अस्य समयसारण्याः अनुसारं कार्यविधिः करणीया। उल्लेखनीयं वर्तते यत् प्रदेशस्य ३५८६ पञ्चायतेषु, ७३ नगरनिकायेषु निर्वाचनानि भवितव्यानि। पञ्चायतानां जनप्रतिनिधीनां पञ्चवर्षाणां कार्यकालः विगते ३१ जनवरी दिनाङ्के समाप्तः अभवत्। ततः परं सर्वकारेण पञ्चायतेषु प्रशासकाः नियुक्ताः सन्ति। एवमेव ४७ नगरनिकायेषु अपि कार्यकाल- समाप्त्यनन्तरं सर्वकारेण प्रशासकाः नियुक्ताः।

# हिमाचलप्रदेशे अद्य गम्भीररोगाः असाध्यः न भविष्यन्ति, एम्स बिलासपुर इति संस्थानेन आधुनिक- परिशोधन- प्रक्रिया आरब्धा




हिमसंस्कृतवार्ताः- बिलासपुरम्।सर्वत्र विश्वे प्रतिवर्षं फरबरीमासस्य अन्तिमः दिवसः "विश्व- दुर्लभरोग- दिवसः" इति रूपेण आचर्यते। वर्षे २०२६ तमे "More Than You Can Imagine" इति विषयवस्तुना सह दुर्लभरोगैः पीड्यमानानां परिवाराणां संघर्षः विशेषतया प्रकाश्यते। अस्मिन् सन्दर्भे एम्स बिलासपुर संस्थानेन महत्त्वपूर्णा सिद्धिः प्राप्ता अस्ति। संस्थाने उच्च-जोखिमयुक्तानां मातॄणां नवजात-शिशूनां आनुवंशिक-विकाराणां परीक्षणं अधुना "टैण्डम- मास- स्पेक्ट्रोमेट्री" इति आधुनिक-प्रौद्योगिक्या क्रियते। दुर्लभरोगाणां प्रबन्धने प्रमुखा समस्या समये रोगस्य अपरिचयः अस्ति। अत्र अस्याः आधुनिक- प्रणाल्याः साहाय्येन शिशूनां रक्तप्रारूपाणां सूक्ष्मपरीक्षणं विधीयते। विशेषज्ञाः वदन्ति यत् यदि रोगः प्रारम्भिकेषु घटीषु अथवा दिनेषु एव ज्ञायते, तर्हि समये उपचारं कृत्वा शिशुं स्थायी- विकलाङ्गतायाः, अन्येभ्यः गम्भीर- अपायभ्यः रक्षितुं शक्यते।

आङ्किक-विवरणानुसारं विश्वे बहवः दुर्लभरोगाः सन्ति, येषां प्रभावः प्रायः अष्ट-प्रतिशतं जनसंख्यां स्पृशति। तेषु प्रायः पञ्चसप्ततिः प्रतिशतं बालकाः सन्ति। संस्थानस्य कुलपतिः डॉ. राकेश कुमार सिंह इत्यनेन उक्तं यत् भारतसर्वकारस्य "राष्ट्रीय- दुर्लभरोग- नीतिः" अन्तर्गतं रोगिणां कृते प्रदत्तासु सुविधासु महत्त्वपूर्णः विस्तारः कृतः। अद्यतननीतेः अधीनं त्रिषष्टिः (६३) दुर्लभरोगाः उपचारार्थं अधिसूचिताः सन्ति।

# 500 वर्षाणाम् ऐतिहासिक धरोहरं समर्पिता टांकरी लिपि- प्रशिक्षणकार्यशाला भव्यतया समाप्ता




**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** सरदारपटेलविश्वविद्यालयस्य मण्डी इत्यस्य इतिहासविभागस्य भारतीय- ज्ञानपरम्परा- प्रकोष्ठद्वारा आयोजितायाः टांकरीलिपि- प्रशिक्षणकार्यशालायाः समापनसमारोहः अत्यंत- गरिमामये वातावरणे सम्पन्नोऽभवत्। समारोहस्य मुख्यातिथिः विश्वविद्यालयस्य कुलगुरुः आचार्यः (डॉ.) ललितकुमार अवस्थी आसीत्। कार्यक्रमस्य अध्यक्षता ठाकुर रामसिंह- शोधसंस्थानं नेरी, हमीरपुरस्य निदेशकः डॉ. चेतरामगर्गः अकरोत्। मुख्यवक्तृरूपेण संस्कृत- विश्वविद्यालयः बलाहरतः सहायकाचार्यः डॉ. यज्ञदत्तशर्मा उपस्थितः आसीत्। विशिष्टातिथिषु विनोदबहलः, जगदीशकपूरश्च आसन्। विशिष्टातिथिरूपेण योजना एवं विकास अधिष्ठाता डॉ. सुनीलठाकुरः उपस्थितः आसीत्। अस्मिन् अवसरे डॉ. पमिता अवस्थी विशेषरूपेण उपस्थिता आसीत्। कार्यक्रमसंयोजकः इतिहास- विभागाध्यक्षः डॉ. राकेशकुमारशर्मा उपस्थितः आसीत्। मंचसंचालनं दीपक दीपांशु- सुहानी शर्मा च कृतवन्तौ।

कार्यक्रमस्य शुभारम्भः टांकरीलिपेः प्रदर्शन्याः अवलोकनेन अभवत्। डॉ. सनीलठाकुरः अतिथीनाम् औपचारिकं स्वागतं परिचयञ्च अकरोत्। कार्यशालाप्रतिवेदनं डॉ. रामपालद्वारा प्रस्तुतम्। डॉ. राकेशकुमारशर्मा कार्यशालायाः उद्देश्यं 500 वर्षाणाम् ऐतिहासिकधरोहरेण युक्त- प्रासंगिकता अपि प्रकाशिता। मुख्यवक्ता डॉ. यज्ञदत्तशर्मा टांकरीलिपे ऐतिहासिकमहत्वं, हिमाचलस्य सांस्कृतिकम् अभिधानं भारतीय- ज्ञानपरम्परायाम् अस्याः योगदानं च रेखांकयन् युवावर्गस्य एतम् अग्रे सारयितुम् आह्वानम् अकरोत्। प्रशिक्षुषु भोपेंद्रः, मनीषा च अनुभवं समुपस्थापयन्तौ कार्यशालां ज्ञानवर्धिनीं प्रेरणादायिनीं च अवदत्।

अध्यक्षीयसंबोधने डॉ. चेतरामगर्गः क्षेत्रीयलिपिषु लोकपरम्पराणां संरक्षणे समयस्य आवश्यकता अवदत्। मुख्यातिथिः आचार्यः (डॉ.) ललितकुमार अवस्थी, कुलगुरुः, सरदारपटेलविश्वविद्यालयः मण्डी स्व- उद्बोधने विश्वविद्यालये भारतीय- ज्ञान- परम्परायाः संवर्धने बलं दत्तवान्। तेनोक्तं यत् इदम् अस्माकं दायित्वम् अस्ति यत् वयं स्व सांस्कृतिकम्, ऐतिहासिकं च धरोहरं युववर्गपर्यन्तम् आनयेयुः। तं च आधुनिक- शोध- शिक्षायाः माध्यमेन च संरक्षितं कुर्मः। सः टांकरीलिपिं न केवलम् प्राचीनलिपिरूपेण अपि तु हिमाचलप्रदेशस्य सांस्कृतिकम् अभिधानं, स्थानीयस्य इतिहासस्य महत्त्वपूर्णं स्रोतं कथयन् शोधस्य, अध्ययनस्य च मुख्यधारायां सम्मेलयितुं आह्वानम् अकरोत्। कुलपतिवर्यैः विद्यार्थिनः, शोधकर्तारश्च प्रेरिताः यत्ते एतस्य संरक्षणे प्रसारे च सक्रियभूमिकां निभालयन्तु। अनेन टांकरीलिपिः अग्रिमसंततीनां कृते जीवंतः उपयोगी च भवेत्।

समारोहे महत्त्वपूर्णपुस्तकयोः विमोचनमपि कृतं, यत्र विनोदबहलवर्यस्य काव्यसंग्रहः ‘लाड़ी री झणांग’ इति जगदीशकपूरद्वारा अनुदितं ‘स्वामी कृष्णानन्द की जीवन कहानी’ इति पुस्तके सम्मिलिते। शिवकुमारसूर्यवर्येण एतयोः समीक्षा कृता। तदनु उभौ लेखकौ स्वविचाराः प्रकटिताः। कार्यक्रमस्य अंतर्गतं प्रशिक्षुभ्यः प्रमाणपत्रप्रदानमपि कृतम्। विशिष्टयोगदानाय सम्मानमपि वितरितम्। विकेशकुमारः धन्यवादप्रस्तावं प्रस्तुतवान्। राष्ट्रगानेन औपचारिकसत्रस्य समापनम् अभवत्।

“मण्डीनगरस्य इतिहासः, परम्परा च” विषयेऽस्मिन् गोष्ठी अपि आयोजिता। यत्र विद्वांसः मण्डीनगरस्य समृद्ध- सांस्कृतिक- धरोहरविषये विचारविमर्शम् अकुर्वन्। अत्रापि मंचसंचालनं दीपकदीपांशु- सुहानी शर्मा चैव अकुरुताम्। टांकरीलिपि- प्रशिक्षणकार्यशालायाः समापनसमारोहेऽस्मिन् इतिहासविभागस्य सहायकाचार्यः डॉ. रामपालः, राजेशशर्मा, विकेशकुमारः, अतिथिप्रवक्ता कृष्णचंदः, टांकरीलिपेः विशेषज्ञः हरिकृष्ण मुरारी, कार्तिकशर्मा, डॉ हरीश बहलः, अनिलशर्मा, पुष्पराजटंडनः, एम. पी. वैद्यः, रुपेश्वरी शर्मा, बीरबलशर्मा सहितं विभिन्नक्षेत्रेभ्यः आगताः विशेषज्ञाः अपि आमंत्रिताः आसन्। एतदतिरिक्तं मण्डीनगरस्य विभिन्नाः पारंगतविद्वांसः अपि भागम् ग्रहीतवन्तः। कार्यशालायाम् अस्यां 93 प्रशिक्षवः टांकरीलिपेः प्रशिक्षणं प्राप्तवन्तः। इतिहास- सोसाइटी- सदस्याः, शोधार्थिनः, विद्यार्थिनश्च कार्यक्रमे उपस्थिताः आसन्। राष्ट्रीयगानेन कार्यक्रमः सम्पन्नः।

# ब्रिगेडियर- विद्याधर- जुयाल- संस्कृतविद्यालये उत्तरमध्यमाछात्राणां दीक्षान्त- सौप्रस्थान- समारोहः




**हिमसंस्कृतवार्ताः- डॉ नवीन ममगाई, पौडी गढवालः** (उत्तराखण्डम्)पौडी जनपदस्य कोट-विकासखण्डे फरवरीमासस्य सप्तविंशतितमे दिनाङ्के, कोटविकासखण्डे ब्रिगेडियर- विद्याधर- जुयाल- संस्कृत- महाविद्यालये स्नेह-संस्कारस्मृतीनां त्रिवेणीसङ्गमस्य अपूर्वं साक्ष्यमभजत्। अस्मिन् दिवसे उत्तरमध्यमा- द्वितीयवर्षस्य (द्वादश कक्षायाः) छात्राणां कृते आयोजितः सौप्रस्थानसमारोहः अतीव भव्यतया, गरिमामय्या रीत्या, भावविह्वल-वातावरणे च परिसम्पन्नः।

शैशवकालादेव गुरुकुलस्य वात्सल्यमये स्थाने स्थित्वा, गुरुचरणानां पावनसान्निध्ये शिक्षां, अनुशासनं, सनातनसंस्कृतेः अमूल्यतत्त्वानि च आत्मसात् कृतवतां छात्राणां कृते अयं क्षणः जीवनस्य कश्चन अनिवार्यः परं च मार्मिकः अध्यायः आसीत्। वर्षाणां कठोरतपस्या, सहपाठिनां निष्कपटा मैत्री, गुरुकुलस्य सात्त्विकी चर्या च संस्मृत्य सर्वेऽपि छात्राः बाष्पपूर्णनेत्राः संवृत्ताः। तत्रैकतः विच्छेदस्य दारुणा वेदना आसीत्, अपरतः स्व- उपलब्धीनां सात्त्विकः गर्वः अपि आसीत्। विद्यालयस्य प्रधानाचार्य प्रबन्धकः राजेन्द्र जुयालः शुभकामना प्रेषितवान्, प्रधानाचार्यः अनसूया प्रसाद सुन्दरियालः उपाचार्यः नवीन जुयालश्च स्व आशीर्वतने उक्तं यत् गुरुकुले केवलं पाठ्यज्ञानस्य उपदेशः न भवति, अपि तु अत्र शिष्याणां चरित्रनिर्माणम्, अनुशासनपालनं, राष्ट्रभक्तेः संवर्धनं, संस्कृतिसंरक्षणं च साध्यते। गुरुकुलपरम्परा भारतीयसंस्कृतेः मूलाधारः अस्ति, या शिष्याणां जीवनं मूल्यैः आदर्शैश्च आलोकयति। इदानीं सः समयः समागतः यदा यूयं गुरुकुलस्य पावनच्छायां विहाय विस्तीर्णे जीवनक्षेत्रे प्रवेष्टुं सज्जाः भवथ। एषा न केवलं कार्यक्रमः अपि तु नवजीवनयात्रायाः शुभारम्भः अस्ति। स्व- लक्ष्यसिद्धये दृढसंकल्पेन, अनवरतपरिश्रमेण, राष्ट्रनिष्ठया च समाजस्य सेवां कुरुत।अत्र प्राप्ताः संस्काराः शिक्षाश्च भवतां जीवनमार्गे सदैव दीपशिखावत् प्रकाशं दास्यन्ति। विपत्तयः आगमिष्यन्ति, परन्तु धैर्येण, आत्मविश्वासेन, संयमेन च सर्वाः बाधाः अतिक्रमणीयाः सन्ति। उभौ आचार्यौ शिष्यान् प्रेरितवन्तौ यत् ते स्वपितॄणां, गुरूणां, गुरुकुलस्य च कीर्तिपताकां दिगन्तरेषु प्रसारयेयुः, स्वकर्मणा राष्ट्रस्य समाजस्य च गौरवं वर्धयेयु।

डॉ. नवीन ममगाईः उक्तवान् "यदा अभिभावकाः स्वकीयान् सुकुमारान् बालकान् गुरुहस्ते समर्पयन्ति, तदा ते विश्वासस्य बीजं वपन्ति। अद्य तदेव बीजं ज्ञान-संस्कार-प्रतिभानां महावृक्षरूपेण पल्लवितं भूत्वा समाज-रूपी महारण्ये स्व-सुगन्धिं विस्तारयितुं सज्जमस्ति।"

डॉ. अनूप कुकरेतीः "यः जनः स्वात्मानुशासनं, कठोरतपस्यां, लक्ष्यनिष्ठां च जीवनस्य मूलमन्त्रं करोति, सिद्धिः तस्य दासी भवति।"

अस्मिन् मङ्गलोत्सवे ईशान डोभालः, नीरज पटवालः, अंकित मैठाणी प्रभृतयः विद्वांसः अध्यापकाः अपि छात्रेभ्यः मार्गदर्शनं प्रदत्तवन्तः। अन्ते सम्पूर्णः गुरुकुलपरिवारः छात्राणां कृते उज्ज्वल- यशस्वी- यशःपूर्ण- भविष्याय परःसहस्रं मङ्गलकामनाः अकरोत्।

# निर्वाचनआयोगेन पश्चिमबङ्गे अपूर्णा अन्तिमा मतदातासूची प्रकाशिता

सर्वोच्चन्यायालयस्य निर्देशानुसारं निर्वाचन-आयोगस्य मार्गदर्शिकानां पालनेन च निर्वाचनआयोगेन पश्चिमबङ्गे अपूर्णा अन्तिमा मतदातासूची प्रकाशिता। विशेषगहनपुनरीक्षणप्रक्रिया याः (SIR) अनन्तरं प्रकाशितायाम् अस्यां सूच्यां मतदातृणां कुलसंख्या ७ कोटिः ४ लक्षं ५९ सहस्रं २८४ अस्ति। मुख्यनिर्वाचन-अधिकारी मनोजकुमारअग्रवालः उक्तवान् यत् प्रारूपप्रकाशनसमये मतदातृणां कुलसंख्या ७ कोटिः ८ लक्षं १६ सहस्रं ६३० आसीत्। पुनरीक्षणप्रक्रियायां नामानि योजयित्वा निष्कासनस्य च अन्तिमसूच्याः ५ लक्षं ४६ सहस्रं ५३ नामानि दूरीकृतानि। प्रारूपसूच्यां पूर्वमेव ५८ लक्षं २० सहस्राधिकानि नामानि निष्कासितानि आसन्। सम्प्रति राज्यस्य मतदातासूच्याः आहत्य ६३ लक्षं ६६ सहस्रं ९५२ नामानि निष्कासितानि सन्ति। विचाराधीनाः मतदातारः प्रायः ६० लक्षं ६ सहस्रं ६७५ मतदातृणां नामानि अद्यापि विचाराधीनानि सन्ति, तथापि तानि अन्तिमसूच्यां सम्मिलितानि। एतेषां भविष्यं पुनरीक्षणप्रक्रियायां नियुक्तस्य न्यायिक-अधिकारिणः निर्णयाधीनम् अस्ति।

**पुनः सम्मिलनप्रक्रिया:** यदि कस्यापि नाम प्रमादेन निष्कासितं, तर्हि आगामी १५ दिनेषु सः मतदाता आक्षेपं कर्तुं शक्नोति।

**सूची-उपलब्धता:** अन्तिमा सूची सर्वेषु मतदानकेन्द्रेषु, पञ्जीकरणअधिकारिणां कार्यालयेषु च प्रदर्शिता अस्ति। राजनैतिकदलेभ्यः अस्याः प्रतयः पूर्वमेव प्रदत्ताः। पश्यन्तुः नागरिकाः स्वकीयं नाम निर्वाचनआयोगस्य जालपुटे (Website) अथवा 'ईसीआई नेट' (ECI Net) इति तन्त्रांशे (App) ईपीआईसी (EPIC) सङ्ख्यायाः उपयोगं कृत्वा द्रष्टुं शक्नुवन्ति।

# आन्ध्रप्रदेशे विस्फोटदुर्घटना: शोकसंवेदना च




राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी. पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्र मोदी, गृहमंत्री अमित शाह च आन्ध्रप्रदेशस्य काकीनाडाजनपदे एकस्मिन् यन्त्रागारे (Factroy) जातेन विस्फोटेन अभूतपूर्वप्राणहानेः विषये गभीरं दुःखं प्रकटितवन्तः। सामाजिक-माध्यमे (Social Media) एकस्मिन् सन्देशे राष्ट्रपतिः मुर्मु महोदया इमां दुर्घटनाम् अत्यन्तं दुःखदाम् अघोषयत्, व्रणितानां शीघ्रस्वास्थ्यलाभाय च कामनामकरोत्। उपराष्ट्रपतिः शोकसन्तप्तपरिवारेभ्यः स्वसंवेदनां प्रकटितवान्, दुर्घटनायां

क्षतानां जनानां शीघ्रम् आरोग्यप्राप्तये प्रार्थनामकरोत्। प्रधानमन्त्री नरेन्द्र मोदी 'प्रधानमन्त्री-राष्ट्रीय-सहायता-कोषतः' प्रत्येकं मृतस्य मृतकशरीरस्य कृते (परिजनेभ्यः) लक्षद्वयं (२,००,०००) रूप्यकाणां साहाय्यराशिं दातुं घोषितवान्। विस्फोटघटने आहतानां कृते पञ्चाशत्-सहस्रं (५०,०००) रूप्यकाणि प्रदास्यन्ते। प्रधानमन्त्री स्वपरिजनान् खोदितवद्भिः जनैः सह सहानुभूतिं प्रकटितवान्। गृहमंत्री अमित शाहः अवदत् यत् दुर्घटनास्थले रक्षण-सहायता-कार्याणि निरन्तरं प्रचलन्ति, व्रणितेभ्यः वैद्याकीय-साहाय्यं प्रदीयते च।

# "बोधकथा"

# जीवनपाठा




''ये अस्माकं मूल्यं न जानाति तेभ्यः दूरं तिष्ठन्तु "मृत्योःपूर्वं पिता पुत्रमब्रवीत्, मम पितामहः मह्यं एषा घटिकाम् अयच्छत्। एषा घटिका द्विसहस्र वर्षेभ्यः पुरातनी अस्ति। अहं तुभ्यं एतां घटिकां ददामि, त्वं सुवर्णालङ्कारस्य आपणं गत्वा केवलं मूल्यं पृष्ट्वा प्रत्यागच्छतु। तदनुसारेण सः आपणं गत्वा मूल्यं पृष्टवान्। प्रत्यागत्य स्वपितरम् अवदत्- एतया घटिकायाः मूल्यं शताधिकपञ्चाशत् [१५०] इति आपणिकेन उक्तः। आपणिक उक्तवान् एषा घटिका बह्वी पुरातनी अस्ति इति उक्तम्। पिता अवदत् अस्तु। पिता पुत्रम् आदिशत् इदानीं त्वं त्याज्यवस्तूनि आपणं गच्छतु। पित्रादेशानुसार पुत्र त्याज्यवस्तूनि आपणं गत्वा घटिकायाः मूल्यं अपृच्छत्। तेन केवलः विंशति [२०] रुप्यकाणि इति उक्तः। इदानीं पिता पुत्रम् अवदत् अधुना सङ्ग्रहालये गच्छतु। पुत्र सङ्ग्रहालयं अगच्छत्, तदनन्तरं सः अत्यान्देन गृहम् प्रत्यागतः। पितरम् उक्तवान्- सङ्ग्रहालयस्य व्यवस्थापकः एतां घटिकां दुर्लभां मत्वा अमूल्यानि वस्तूनि सङ्ग्रहे स्थानं दत्ता तथा च पञ्चलक्षरुप्यकाणि [५ लाख] दातुं प्रस्तावः। पिता स्मितहास्य कृत्वा अवदत्- योग्यस्थाने एव युष्माकं योग्यं मूल्यं भवति। स्वमूल्यं विपरीत स्थाने मा अन्विष्यतु।

**"काकः कृष्णः पिकः कृष्णस्त्वभेदः पिककाकयोः।**
**वसन्ते समुपायते काकः काकः पिकः पिकः।"**

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। बङ्गलूरु-नगरे एकया महिलया स्वस्य मासिक-व्यय-विवरणम् अन्तर्जाले प्रकाशितम्।

**नन्दिनी-** आम्, मया अपि तत् दृष्टम्। द्व्यशीति-सहस्र-रूप्यकाणि तया व्ययीकृतानि! तत्र भाटकाय मनोरञ्जनाय च बहु धनं दत्तम्।

**काव्या-** बङ्गलूरु-नगरे वास-मूल्यं खलु वर्धितम्। अन्या वार्ता कृत्रिम-मेधा-विषये अस्ति। एकया संस्थया नूतना वाहन-सुरक्षा-व्यवस्था आरब्धा।


**नन्दिनी-** आम्, एतत् उत्तमं कार्यम्। कृत्रिम-मेधया चालकानां व्यवहारः परीक्षितः। सा व्यवस्था सम्भाव्याः दुर्घटनाः निवारितवती अस्ति।

**काव्या-** तन्त्रज्ञानस्य उपयोगः अतीव लाभदायको जातः। इदानीं कला-विषये वदामि। सुदर्शन-महोदयेन इटली-देशे प्रदर्शनाय वालुका-चित्राणि सज्जीकृतानि।

**नन्दिनी-** तस्य कला अतीव रमणीया। तेन सिकता-वर्णयोः मेलनं कृतम्। सा कला 'जुगलबन्दी' इति नाम्ना ज्ञाता अस्ति।

**काव्या-** सः देशस्य गौरवम् अस्ति। अन्ते, नूतनाः वित्त-नियमाः सर्वकारेण उद्घोषिताः।

**नन्दिनी-** आम्, पथकर-पत्रस्य ग्राहक-परिचय- प्रक्रिया अनिवार्या कृता। ऋणपत्रस्य नियमाः अपि परिवर्तिताः। जनैः एतत् ज्ञातव्यम्।




# लुब्धः कुक्कुरः (लालची कुत्ता)

एकदा एकः कुक्कुरः (कुत्ता) अतीव बुभुक्षितः (भूखा) आसीत्। सः भोजनस्य अन्वेषणं कुर्वन् एकं अस्थिखण्डं (हड्डी का टुकड़ा) प्राप्तवान्। सः तं खण्डं मुखे गृहीत्वा एकस्याः नद्याः तटं गतवान्।

नद्याः उपरि एकः सेतुः (पुल) आसीत्। यदा कुक्कुरः सेतोः उपरि चलति स्म, तदा सः अधः नद्याः जले स्वस्य प्रतिबिम्बम् (परछाई) अपश्यत्।

**कुक्कुरस्य भ्रमः (कुत्ते का भ्रम)**

सः अचिन्तयत्— "अहो! अत्र अन्यः कुक्कुरः अस्ति, तस्य मुखे अपि एकः अस्थिखण्डः अस्ति। यदि अहं तस्य खण्डम् अपि प्राप्नोमि, तर्हि मम आनन्दः द्विगुणः भविष्यति।"

एवं विचिन्त्य सः लोभेन अभिभूतः अभवत्। सः तं अन्यं कुक्कुरं भीतयितुं (डराने के लिए) भषणम् (भौंकना) आरब्धवान्।

यथैव सः मुखम् उद्घाटितवान् (खोला), तस्य मुखात् सः अस्थिखण्डः जले अपतत्। कुक्कुरः अतीव दुःखी अभवत्। सः रिक्तहस्तः एव अतिष्ठत्।

## शिक्षा (Moral)

"लोभः पापस्य कारणम्।"
(लालच पाप और दुःख का कारण होता है।)